**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# दुर्गासप्तशत्यन्तर्गतदेवीकवचस्य तिङन्तपदानां शब्दशास्त्रीयविचारः

**कृष्णप्रसादभण्डारी**

*उपप्राध्यापकः, ने.सं.वि., जनताविद्यापीठम्*

krishna.bhandari1@nsu.edu.np

https://orcid.org/0009-0004-7262-6085

https://doi.org/10.3126/srj.v1i2.99125

**लेखसारः**

*श्रीदुर्गासप्तशत्यन्तर्गतदेवीकवचे प्रयुक्तानि तिङन्तपदान्यस्मिन्नालेखे विमृश्यन्ते। देव्युपासकैर्भगवत्या दुर्गादेव्याः समाराधनप्रसङ्गे दुर्गासप्तशती पठ्यते । तत्र सप्तशतीमूलपाठात्पूर्वमेव वाराहपुराणोक्तहरिहरब्रह्मविरचित–देवीकवचपाठस्य विधिर्निर्दिष्टः। कवचेऽस्मिन् षट्पञ्चाशच्छ्लोकाः सङ्गृहीताः। तेषु विविधानि तिङन्तपदानि प्रयुक्तानि। देवीकवचे पाणिनीयव्याकरणाभिमततिङन्तपदप्रयोगपक्षः कीदृशोऽस्तीति मुख्यसमस्यामुद्भाव्य तिङन्तपदानामन्वेषणं व्युत्पत्तिप्रदर्शनञ्च विधाय तानि पाणिनीयव्याकरणसम्मतानि सन्ति न वेत्यालेखेऽस्मिन् विचारितानि। गुणात्मिकां दृष्टिमवलम्ब्य विहितेऽस्मिन्ननुसन्धानात्मके लेखे पुस्तकालयात् प्रविधिमाध्यमेन च सामग्रीः सङ्कलय्य देवीकवचान्तर्गतानां तिङन्तपदानां व्युत्पत्तिप्रदर्शनेऽर्थापने च विश्लेषणात्मकविधेः प्रयोगो विहितः। पाणिनीयव्याकरणस्य तिङन्तप्रकरणमत्रानुसन्धाने सैद्धान्तिकाधारत्वेन गृहीतम्। शब्दशास्त्रमस्य व्याकरणस्यापरं नाम। धातोस्तिङ्प्रत्यये कृते तिङन्तपदानि निर्मीयन्ते। अत्र देवीकवचे प्रयुक्तानां तिङन्तपदानामुपदेशावस्थायां के धातवः ? कस्तावत्तेषामर्थः ? दशगणेषु ते कस्मिन्गणे उपदिष्टाः ? परस्मैपदात्मनेपदोभयपदेषु मध्ये तेषां कतमत्वम् ? सकर्मकोऽकर्मको वा ? को लकारः ? पुरुषवचने च के ? कैश्च सूत्रैः कथञ्च सिद्धिर्भवतीति चास्मिन्नालेखे निरूप्यते। तत्र कस्मिन्नर्थे लकारो विहितोऽस्ति– कर्तरि कर्मणि भावे वा ? कर्तरि विहितस्य तिङन्तपदस्य कर्मणि भावे वा कीदृशं रूपं सम्भवति ? कर्मणि भावे वा लकारविधाने सति निष्पन्नस्य तिङन्तपदस्य कर्तरि किं रूपमिति च विचार्यते। अन्ते समुद्भावितसमस्यानिराकरणार्थं देवीकवचान्तर्गतश्लोकस्थतिङन्तपदानां सप्रमाणं व्युत्पत्तिविश्लेषणं विधाय कवचेऽस्मिन् प्रयुक्तेषु त्रिंशत्पदानि पाणिनीयसूत्रैः सिद्धानि; परन्तु शृणुष्व, रक्षसे, त्राहीति त्रीण्यपाणिनीयानि तिङन्तपदानि प्रयुक्तानि। अपाणिनीयत्वसिद्धत्वेऽप्यार्षत्वात् तानि साधुत्वेन स्वीकर्तव्यानि भवन्तीति निष्कर्षः संस्थापितः। रुचिवर्धकरूपेण व्यावहारिकरूपेण च तिङन्तपदशिक्षणे दुर्गासप्तशत्यन्तर्गतदेवीकवचस्थतिङन्तपदयुक्तश्लोकानामुदाहरणरूपेण प्रयोगे लेखोऽयमुपयोगी भविष्यतीत्यपेक्ष्यते।*

**शब्दकुञ्जिका** – अकर्मकः, आत्मनेपदम्, धातुः, परस्मैपदम्, सकर्मकः।

## विषयपरिचयः

प्राचीनकालादेव सुदीर्घपरम्पराप्राप्तस्य श्रीदुर्गासप्तशत्यन्तर्गतस्य देवीकवचस्य नेपाले विशेषतो धार्मिकसमाजे सर्वत्र गेहे गेहे जने जने च प्रसिद्धिर्वर्तते। कवचमिदं न केवलं शक्तिसमुपासकैरेव अपितु शैवैर्वैष्णवैश्च समानदृष्ट्या आद्रियमाणं दृश्यते। तेष्वपि तन्त्रसाधका ब्रह्मचारिणो वानप्रस्था गृहस्थाः साधवश्च देव्युपासनानुष्ठानादिकर्मसु स्तोत्रमिदं

सश्रद्धं सभक्ति च गृह्णन्ति, पठन्ति शृण्वन्ति च। सप्तशत्यामादौ कवचार्गलाकीलकादीनि स्तोत्राणि सङ्गृहीतानि सन्ति। तत्र त्रयोदशाध्यायनिबद्धेन सप्तशतीमुख्यपाठेन सह कवचपाठस्यापि पारम्परिकविधानं वर्तते।

देव्याः कवचं देवीकवचम्। दीव्यतीत्यर्थे दिव्धातोर्नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (अ.३/१/१३४) इत्यनेनाच्प्रत्यये टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः (अ.४/१/१५) इत्यनेन ङीपि च सति देवीशब्दस्य सिद्धिर्जायते। देवीशब्दोच्चारणे दुर्गा–काली–लक्ष्मी–सरस्वतीत्यादीनि नामान्यस्माकं स्मृतिपथमागच्छन्ति। शब्दकल्पद्रुमानुसारेण कं देहं वञ्चति विपक्षास्त्राणि वञ्चयित्वा रक्षतीत्यर्थे कवचशब्दस्य निष्पत्तिर्भवति (Jha, 2023)। अमरसिंहेन चोक्तम्– उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियामिति (अमरकोशः, २/४/६४)। एतेन सुरक्षार्थं धारणीयमावरणं कवचमर्थात् यस्य पठनमात्रेणापि जनानां रक्षणं भवति, तत्कवचमिति वक्तुं शक्यते।

देवीकवचं दुर्गाकवचनाम्ना चण्डीकवचनाम्ना च समाजे प्रथितम्। अत्र वाराहपुराणान्तर्गताः षट्पञ्चाशच्छ्लोकाः सन्निविष्टा वर्तन्ते। तत्रादौ मार्कण्डेयो ब्रह्माणं प्रति पृच्छति यत्– इह संसारे परमगोपनीयं सर्वेषां मनुष्याणां रक्षणोपायं कथयेति। तदनन्तरं ब्रह्मा पञ्चपञ्चाशच्छ्लोकैस्तस्योपायं वदति। षट्पञ्चाशच्छ्लोकनिबद्धेऽस्मिन् देवीकवचे प्रयुक्तानि तिङन्तपदान्यत्र शब्दशास्त्रदृष्ट्या विचार्यन्ते।

## समस्याकथनम्

क) दुर्गासप्तशत्यन्तर्गतदेवीकवचे प्रयुक्तास्तिङन्तशब्दाः के ? कथञ्च तेषां व्युत्पत्तिः क्रियते ?
ख) दुर्गासप्तशत्यन्तर्गतदेवीकवचे पाणिनीयव्याकरणाभिमततिङन्तपदप्रयोगपक्षः कीदृशः ?

## उद्देश्यकथनम्

क) दुर्गासप्तशत्यन्तर्गतदेवीकवचे प्रयुक्तानां तिङन्तपदानामन्वेषणं व्युत्पत्तिप्रदर्शनञ्च।
ख) दुर्गासप्तशत्यन्तर्गतदेवीकवचे पाणिनीयव्याकरणाभिमततिङन्तपदप्रयोगपक्षनिरूपणम्।

## पूर्वकार्याणां समीक्षा

मयाऽस्मिन्नालेखे श्रीदुर्गासप्तशत्यन्तर्गतदेवीकवचविषयेऽधुनावधि कृतानि सम्प्राप्तानि पूर्वकार्याणि समीक्षितानि सन्ति। समीक्षणे प्राप्तानां तथ्यानां वैधतां प्रमाणतां विश्वसनीयताञ्च विचार्य सामग्रीसङ्कलनं विहितमस्ति। अत्र विविधैर्विद्वद्भिः कृतानां कार्याणामध्ययनं विधाय विषयसम्बद्धा एव सामग्र्यः स्थापिताः। इत्थं पूर्वकार्याणामध्ययनङ्कृत्वा समीक्षान्ते शोधान्तरालञ्च प्रस्तुतम्।

श्रीकृष्णदासात्मजेन खेमराजेन श्रीवेङ्कटेश्वरयन्त्रालयेऽङ्कयित्वा प्रकाशिता श्रीनागोजीभट्टकृतव्याख्यासमेता नीलकण्ठकृतटीकासहिताङ्गषट्कसहिता सभाष्यदेवीसूक्तरात्रिसूक्तसहिता च प्राचीना दुर्गासप्तशती (१९५२) प्राप्यते। तत्र द्विपञ्चाशत्पृष्ठाङ्कादारभ्य पञ्चपञ्चाशत्पृष्ठाङ्कपर्यन्तं देव्याः कवचस्य सार्द्धपञ्चाशच्छ्लोका व्याख्याताः सन्ति। किन्तु तत्र सत्यपि व्याख्याने देवीकवचान्तर्गतानां तिङन्तपदानां व्याकरणदृष्ट्या विश्लेषणं नैव कृतं दृश्यते।

पण्डितश्रीसरयूप्रसादशर्मणा सप्तशतीसर्वस्वम् (१९७२) नामकस्टीकाग्रन्थः प्रणीतः। अनेन विविधान् मूलग्रन्थान् टीकाग्रन्थांश्च निपुणं पर्यालोच्य असौ ग्रन्थः सङ्गृहीतो वर्तते। अत्र त्रयो भागाः सन्ति। तेषु प्रथमभागे सव्याख्यानि कवचार्गलाकीलकानि च प्रस्तुतानि विद्यन्ते। तत्र चतुर्दशपृष्ठाङ्काद् द्वात्रिंशत्पृष्ठाङ्कं यावत् देवीकवचस्य

सार्द्धपञ्चाशत्सङ्ख्यकानां श्लोकानां व्याख्यानं विहितमस्ति। व्याख्यानोपक्रमे तिङन्तादिव्याकरणपक्षो नैव विचारितोऽस्ति।

स्वामिरामानन्दगिरिणा पूजाविधिनेपाल्यामनुवादव्याख्यासहिता दुर्गासप्तशती (२०६९) प्राकाश्यं नीता वर्तते। तत्र दुर्गासप्तशत्या नेपाल्यां पदार्थभावार्थविवरणसहिता व्याख्या कृता सत्यपि, देव्याः कवचस्य केवलं भावार्थः प्रस्तुतोऽस्ति। किन्तु कवचस्य व्याकरणपक्षमधिकृत्य कमप्यध्ययनं कृतं न दृश्यते।

सत्यव्रतशास्त्रिणा शन्तनुचक्रवर्तिविरचिता शान्तनवीटीकासमेता प्राचीना दुर्गासप्तशती (२०२३) सङ्कलिता प्राप्यते। तत्रापि सटीकाङ्गषट्कं सभाष्यं देवीसूक्तं रात्रिसूक्तञ्च निवेशितमस्ति। तस्मिन् ग्रन्थे एकोत्तरशतपृष्ठाङ्कादारभ्य सप्तोत्तरशतपृष्ठाङ्कपर्यन्तं देवीकवचस्य सार्द्धपञ्चाशत्सङ्ख्यकानि श्लोकानि व्याख्यातानि सन्ति। परन्तु तत्र व्याख्यानावसरे देवीकवचस्थतिङन्तपदानां व्याकरणशास्त्रीयाभिमतं नोद्घाटितं वर्तते।

अन्ये केचन श्रीदुर्गासप्तशत्या नेपालिभाषायां हिन्दीभाषायाञ्चार्थप्रकाशकग्रन्थाः समुपलभ्यन्ते। तेषु केवलं पदार्थो भावार्थः सरलार्थोऽर्थविश्लेषणं व्याख्यानञ्च कृतं प्राप्यते। परन्तु तत्र व्याकरणस्य गभीरपक्षो नोद्घाटितो वर्तते। इतो व्यतिरिक्तान्यध्ययनानि न दृश्यन्ते। अतोऽस्मिन्नध्ययनकार्ये मम प्रवृत्तिरजायत।

समीक्षितेषु पूर्वकार्येषु श्रीदुर्गासप्तशत्यन्तर्गतदेवीकवचस्थश्लोकानादाय व्याख्यानमर्थप्रदर्शनञ्च विहितं परन्तु तत्र व्याकरणपक्षमाधृत्य किमप्यध्ययनं कृतं न प्राप्यते। देवीकवचे प्रयुक्तानां तिङन्तपदानां विमर्शो दुर्लभो दृश्यते। देवीकवचे पाणिनीयव्याकरणाभिमततिङन्तप्रयोगाः सन्ति न वेति प्रदर्श्य प्रयोगपरीक्षणमभावमानं वर्तते। इत्यतोऽस्यालेखस्यारम्भः कृतो वर्तते।

## अध्ययनविधिः

प्रस्तुतेऽस्मिन्नध्ययने गुणात्मिका दृष्टिरवलम्बिता वर्तते। तत्रापि श्रीदुर्गासप्तशत्यन्तर्गतदेवीकवचे प्रयुक्तानां तिङन्तपदानां व्युत्पत्तिप्रदर्शनेऽर्थापने सिद्धिप्रक्रियायाञ्च विश्लेषणात्मकविधेः प्रयोगो विहितोऽस्ति। आलेखेऽस्मिन् पुस्तकालयात् प्रविधिमाध्यमेन च सामग्रीसङ्कलनं विधाय विषयविश्लेषणं कृतमस्ति। अत्र तिङन्तपदानामध्ययने पाणिनीयव्याकरणसम्बद्धसिद्धान्तकौमुद्यादिग्रन्थेभ्यः श्रीदुर्गासप्तशत्यादिग्रन्थेभ्यश्च सामग्रीः सङ्कलिता विद्यन्ते। सङ्कलितसामग्रीभ्यः सम्प्राप्ततथ्यानां विश्लेषणं विधाय निष्कर्षः संस्थापितो वर्तते।

## सैद्धान्तिकाधारः

प्रस्तुतेऽस्मिन्नालेखे पाणिनीयव्याकरणाभिमतश्रीदुर्गासप्तशत्यन्तर्गतदेवीकवचे प्रयुक्तानां तिङन्तपदानां व्युत्पत्तिविश्लेषणं विहितमस्ति। पाणिनीयव्याकरणसम्बद्धाः पाणिनिविरचिताष्टाध्यायी, धातुपाठः, दीक्षितविरचिता सिद्धान्तकौमुदी चात्र सैद्धान्तिकाधारत्वेनाङ्गीकृताः। तत्रापि विशेषतः सिद्धान्तकौमुद्यास्तिङन्तप्रकरणस्थसूत्राणि, तत्सम्बद्धानि वार्तिकानि, दशगणेषूपस्थापिता धातवो यथावश्यकशीर्षकानुरूपान्यग्रन्थाश्चात्र परिगणिता विद्यन्ते। एतादृशसैद्धान्तिकाधारे देवीकवचे प्रयुक्तान् तिङन्तशब्दान् विविच्य सज्जीकृतोऽयमालेखः। अस्मिन्ननुसन्धानात्मकालेखे प्रविध्यादिविषयं व्यवस्थातुं पौरस्त्यानुसन्धानपद्धतिः सम्प्रतिप्रचलिता एपीएपद्धतिश्चानुसृता वर्तते।

## विश्लेषणप्रक्रिया

देवीकवचे प्रयुक्तानां तिङन्तपदानां व्युत्पत्तिविश्लेषणे केन्द्रीभूयायमनुसन्धानात्मकालेखः प्रस्तुतोऽस्ति। प्रथमन्तावदस्यानुसन्धानात्मकालेखस्य कृते पाणिनीयव्याकरणसम्बद्धग्रन्थाः सिद्धान्तकौमुदी, अष्टाध्यायी, धातुपाठश्च निर्धारिताः। तत्र तिङन्तप्रकरणस्य भ्वादिदशगणस्थसूत्राणां वार्तिकानां तेषामुदाहरणानां प्रत्युदाहरणानाञ्चाध्ययनं विधाय तेषामाधारेण दुर्गासप्तशत्यन्तर्गतदेवीकवचस्य षट्पञ्चाशच्छ्लोकस्थतिङन्तपदानां व्युत्पत्तिविश्लेषणञ्च कृत्वा निष्कर्षः प्रदत्तो विद्यते।

## देवीकवचे प्रयुक्तानां तिङन्तपदानां व्युत्पत्तिविश्लेषणम्

देवीकवचे प्रयुक्तानां तिङन्तपदानां विश्लेषणात् पूर्वं प्रथमन्तावद् देवीकवचस्य विषये किञ्चिदुच्यते–

### देवीकवचम्

देवीकवचे सर्वप्रथमं महामुनिर्मार्कण्डेयो वदति। सः कथयति– हे ब्रह्मन् ! येन सर्वेषां मनुष्याणां रक्षणं स्यात्, यदधुनापर्यन्तं नोक्तं स्यात्, यत् संसारे सर्वोत्कृष्टमतिगोप्यं रहस्यं स्यात्, तन्मह्यं कथयेति। इत्थं प्रथमश्लोके मार्कण्डेयो ब्रह्माणं प्रति प्रश्नं पृच्छति। तदनन्तरं द्वितीयश्लोकादारभ्य षट्पञ्चाशच्छ्लोकपर्यन्तं पञ्चपञ्चाशच्छ्लोकेन मार्कण्डेयं प्रति ब्रह्मा कथयति– हे मुने ! सर्वेषां प्राणिनामभीष्टदं परमगोपनीयं परमपवित्रं देव्याः कवचं विद्यते, तच्छृणु। तत्र त्रिषु श्लोकेषु शैलपुत्री, ब्रह्मचारिणी, चन्द्रघण्टा, कूष्माण्डा, स्कन्दमाता, कात्यायनी, कालरात्री, महागौरी, सिद्धिदात्री चेति देव्या नव नामान्युक्तानि। ततः कवचपाठस्य फलं महत्त्वञ्च वर्णितमस्ति। इतः परं देवीकवचान्तर्गतानां तिङन्तपदानां विश्लेषणं प्रस्तूयते–

**तन्मे ब्रूहि पितामह (दे.क.,१)**

देवीकवचस्य प्रथमश्लोके मार्कण्डेयो मुनिर्वदति– हे पितामह ! लोके परमं गुह्यं, कस्यचित् नाख्यातं, नृणां सर्वरक्षाकरञ्च यदस्ति, तन्मे ब्रूहि। अत्र ब्रूहीति तिङन्तपदं वर्तते। ब्रूञ् व्यक्तायां वाचीति द्विकर्मकोऽयमुभयपदी धातुरदादिगणीयः सेट् च वर्तते (कौ.धा., १०४४)। एतादृशाद्धातोर्लोट् च (अ.३/३/१६२) इत्यनेन कर्तरि लोट्लकारेऽनुबन्धलोपे तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (अ.३/४/७८) इत्यनेन परस्मैपदे मध्यमपुरुषैकवचने सिबादेशे कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपेऽदिप्रभृतिभ्यःशपः (अ.२/४/७२) इत्यनेन शब्लुकि ब्रू+सि इत्यवस्थायां सेर्ह्यपिच्च (अ.३/४/८७) इत्यनेन सेर्ह्यादेशे तुह्योस्तातङाशिष्यन्यतरस्याम् (अ.७/१/३५) इत्यनेन विकल्पेन हेस्तातङादेशेऽनुबन्धलोपे ब्रूतादिति निष्पद्यते, तातङादेशाभावपक्षे ब्रूहीति। अन्यत्र शास्त्रेषु चास्य प्रयोगः प्राप्यते– यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे (गीता, २/७)। आत्मनेपदे ब्रूष्वेति। भावकर्मणोर्लकारे तु उच्यस्वेति रूपम्। एतेन सिद्ध्यति यत्– प्रयोगोऽयं पाणिनीयव्याकरणानुसारी वर्तते।

**अस्ति गुह्यतमं विप्र (दे.क.,२)**

मार्कण्डेयप्रश्नश्रवणानन्तरं ब्रह्मा वदति– हे विप्र ! सर्वभूतोपकारकं गुह्यतमञ्च देव्याः कवचमस्ति। अत्र अस्तीति तिङन्तपदं वर्तते। अस भुवीत्यकर्मकोऽयं परस्मैपदी धातुरदादिगणीयः सेट् च वर्तते (कौ.धा., १०६५)। तस्माद्धातोः वर्तमाने लट् (अ.३/२/१२३) इत्यनेन कर्तरि लट्लकारेऽनुबन्धलोपे तस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपेऽदिप्रभृतिभ्यः शपः (अ.२/४/७२) इत्यनेन शपो लुकि वर्णमेलनेऽस्तीति रूपं जायते। शास्त्रान्तरेषु चास्य प्रयोगो बहुत्र समुपलभ्यते–

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते (गीता, २/४०)। भावे त्वार्धधातुकविवक्षायामस्तेर्भूः (अ.२/४/५२) इत्यनेन भ्वादेशे भूयत इति रूपं सम्भवति।

**तच्छृणुष्वमहामुने (दे.क.,२)**

पुनरपि ब्रह्मा कथयति– हे महामुने ! पुण्यमयं देव्याः कवचं वर्तते, तच्छृणुष्वेति। अत्र श्रृणुष्वेति तिङन्तपदम्। श्रु श्रवणे धातुरयं भ्वादिगणपठितः परस्मैपदी सकर्मकोऽनिट् च वर्तते (कौ.धा., ९४२)। अस्माद्धातोर्लोट् च (अ.३/३/१६२) इत्यनेन कर्तरि लोट्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे मध्यमपुरुषैकवचने सिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् शपि प्राप्ते तं प्रबाध्य श्रुवः शृ च (अ.३/१/७४) इत्यनेन श्रुवः श्रादेशे श्नुप्रत्ययेऽनुबन्धलोपे च कृते ऋवर्णान्नस्य णत्वं वाच्यमिति वार्तिकेन णत्वे शृ+णु+सि इत्यवस्थायां सेर्ह्यपिच्च इत्यनेन (अ.३/४/८७) सेर्ह्यादेशे तुह्योस्तातङाशिष्यन्यतरस्याम् (अ.७/१/३५) इत्यनेन विकल्पेन ह्यत्यस्य स्थाने तातङादेशे शृणुतादिति रूपम्, तातङादेशाभावपक्षे उतश्च प्रत्ययादसंयोगपूर्वात् (अ.६/४/१०६) इत्यनेन हेर्लुकि शृणु इति रूपद्वयञ्च साधुत्वमायाति। महर्षिवेदव्यासविरचितायां गीतायाञ्च शृणु एवेति रूपं प्रयुक्तं दृश्यते– बुद्धिर्योगे त्विमां शृणु (गीता, २/३९)। कर्मणि लकारे तु श्रूयस्वेति सेत्स्यति।

एवञ्च यथा आत्मनेपदिनः एध्धातोर्लोटि मध्यमपुरुषैकवचने थासः से (अ.३/४/८०) इत्यनेन से–आदेशे सवाभ्यां वामौ (अ.३/४/९१) इत्यनेन एकारस्य वादेशे एधस्वेति रूपं निष्पद्यते, एवमुभयपदिनो ब्रूधातोर्लोट्यात्मनेपदे मध्यमपुरुषैकवचने पूर्ववत्प्रक्रियायां सत्यां ब्रूष्वेति सम्पद्यते; तथैवात्र श्रुधातोर्न, परस्मैपदविषयत्वात्। महर्षिपाणिनिना श्रुधातुः परस्मैपदत्वेनोपदिष्टो वर्तते। परन्त्वत्र शृणुष्वेति आत्मनेपदस्य प्रयोगो दृश्यते। एतावता वक्तुं शक्यते यदत्र अपाणिनीयप्रयोगः प्रयुक्तो विद्यते, पाणिनीयव्याकरणाभिमते तु कवचे शृणुष्वेत्यस्य स्थाने शृणु, शृणुताद्वा भवितुमर्हति।

**न तेषां जायते किञ्चित् (दे.क.,७)**

अत्र देवीकवचे 'जायते' इति तिङन्तपदं द्वयोः स्थानयोः प्रयुक्तं वर्तते– न तेषां जायते किञ्चित् (दे.क.,७) इत्यत्र, निर्भयो जायते मर्त्यः (दे.क.,४५) इत्यत्र च। पूर्वत्र तेषां किञ्चिदशुभं न जायते इत्यन्वयांशः। पूर्वोक्तानां जनानाममङ्गलं नोत्पद्यते, अर्थात् मङ्गलमेव भवतीत्यर्थः सम्पद्यते। द्वितीयश्लोके कवचेनावृतः पुमान् निर्भयो जायते इत्यन्वयांशः। तस्य च भयरहितो भवतीत्यर्थः। तन्निर्मितिप्रकारो यथा– जनी प्रादुर्भावे इति दिवादिगणपठितोऽयमात्मनेपद्यकर्मकः सेट् च धातुर्वर्तते (कौ.धा., ११४९)। अस्माद्धातोर्वर्तमाने लट् (अ.३/२/१२३) इत्यनेन लट्यनुबन्धलोपे लस्यात्मनेपदे प्रथमपुरुषैकवचने तादेशे तस्य सार्वधातुकत्वात् शपि प्राप्ते तं प्रबाध्य दिवादिभ्यः श्यन् (अ.३/१/६९) इत्यनेन श्यन्प्रत्ययेऽनुबन्धलोपे टित्त्वात् टित आत्मनेपदानां टेरे (अ.३/४/७९) इत्यनेन टेरेत्वे च सति जन्+य+ते इत्यवस्थायां ज्ञाजनोर्जा (अ.७/३/४९) इत्यनेन जादेशे जायते रूपं सम्भवति। तस्य चोत्पद्यत इत्यर्थः। अन्यत्र शास्त्रेषु चास्य प्रयोगः प्राप्यते– न जायते म्रियते वा कदाचिदिति (गीता, २/२०)। भावे लकारे तु ये विभाषा (अ.३/४/७९) इत्यनेन विकल्पविधानाज्जन्यते इति रूपं सम्भवति।

**नापदं तस्य पश्यामि (दे.क.,७)**

सार्धद्वयश्लोके नवदुर्गाणां नामान्युक्त्वा तेषां स्वरूपं विवृणोति। तस्यापदं न पश्यामीत्यन्वयवाक्यम्। अत्र पश्यामीति तिङन्तपदं वर्तते। दृशिर् प्रेक्षणे भ्वादिगणपठितोऽयं धातुः परस्मैपदी सकर्मकोऽनिट् च वर्तते (कौ.धा., ९८८)। तस्माद्धातोर्वर्तमाने लटि तस्य स्थाने उत्तमपुरुषैकवचने मिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्प्रत्ययेऽनुबन्धलोपे पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां

पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (अ.७/३/७८) इत्यनेन दृशः स्थाने पश्यादेशेऽतोगुणे (अ.६/१/१७) इत्यनेन पररूपे पश्य+मि इत्यवस्थायामतो दीर्घो यञि (अ.७/३/१०१) इत्यनेन दीर्घे च सति पश्यामि। शास्त्रान्तरेषु चास्य प्रयोगः प्राप्यते– पश्यामि देवांस्तव देव देहे (गीता, ११/१५)। कर्मणि लकारे तु दृश्ये इति सेत्स्यति।

**तेषां वृद्धिः प्रजायते (दे.क.,८)**

प्रोपसर्गपूर्वकाद् जनी प्रादुर्भावे (कौ.धा., ११४९) इत्यस्माद्धातोर्लट्यात्मनेपदे प्रथमपुरुषैकवचने तादेशे पूर्वं यथा जायते रूपं सिद्धं तद्वत्प्रजायते इत्यस्य सिद्धिः सम्पत्स्यते। यैर्भक्त्या देवी स्मृता, तेषां नूनं वृद्धिः प्रजायते इत्यन्वयवाक्यम्। अभ्युदयो भवतीत्यर्थः। भावे लकारे तु प्रजन्यते इति सिद्ध्यति।

**ये त्वां स्मरन्ति देवेशि (दे.क.,८)**

हे देवेशि ! ये त्वां स्मरन्ति, तान् रक्षसे इत्यत्र न संशयः इत्यन्वयवाक्यम्। अत्र स्मरन्तीति तिङन्तपदं वर्तते। स्मृ चिन्तायामिति भ्वादिगणपठितो धातुः परस्मैपदी सकर्मकोऽनिट् च वर्तते (कौ.धा., ९३३)। तस्माद्धातोर्वर्तमाने लट् (अ.३/२/१२३) इत्यनेन लट्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषस्य बहुवचने झ्यादेशे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे च कृते स्मृ+अ+झीत्यवस्थायां झोऽन्तः (अ.७/१/३) इत्यनेनान्तादेशे सार्वधातुकार्धधातुकयोः (अ.७/३/८४) इत्यनेन गुणे रपरत्वेऽतोगुणे (अ.६/१/१७) इत्यनेन पररूपे वर्णसम्मेलने च सति स्मरन्तीति सिद्धतामायाति। कर्मणि लकारे तु स्मर्यन्त इति साधुत्वं याति।

**रक्षसे तान्न संशयः (दे.क.,८)**

रक्ष पालने भ्वादिगणपठितोऽयं धातुः परस्मैपदी सकर्मकः सेट् च वर्तते (कौ.धा., ६५८)। अस्माद्धातोः कर्तरि वर्तमाने लट् (अ.३/२/१२३) इत्यनेन लट्लकारे परस्मैपदे मध्यमपुरुषैकवचने सिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्प्रत्ययेऽनुबन्धलोपे वर्णसम्मेलने च सति रक्षसीति सिद्ध्यति। कर्मणि लकारे त्वात्मनेपदत्वात् थासादेशे सार्वधातुकसंज्ञायां सार्वधातुके यक् (अ.३/१/६७) इत्यनेन यक्प्रत्ययेऽनुबन्धलोपे थासः से इत्यनेन से–आदेशे रक्ष्यसे इति रूपं सम्भवति। परन्त्वत्र 'तान् रक्षसे' इति प्रयुक्तो वर्तते। धातुरयं परस्मैपदित्वात् कर्तरि लकारे रक्षसे इति रूपं न सम्भवति। एतावता वक्तुं शक्यते यदत्र पाणिनीयव्याकरणाभिमते रक्षसीति प्रयोक्तव्यमासीत्, परन्तु परस्मैपदस्य स्थाने आत्मनेपदप्रयोगो दृश्यते। अतोऽयमपाणिनीयप्रयोगः।

**दृश्यन्ते रथमारूढा (दे.क.,१३)**

क्रोधसमाकुला रथमारूढा देव्यो दृश्यन्ते इत्यन्वयवाक्यम्। अत्र दृश्यन्ते इति तिङन्तपदं वर्तते। दृशिर् प्रेक्षणे भ्वादिगणपठितः परस्मैपदी सकर्मकोऽनिट् च धातुर्वर्तते (कौ.धा., ९८८)। अस्माद्धातोर्वर्तमाने लट् (अ.३/२/१२३) इत्यनेन कर्मणि लट्लकारेऽनुबन्धलोपे लस्य भावकर्मणोः (अ.१/३/१३) इत्यनेनात्मनेपदे प्रथमपुरुषस्य बहुवचने झादेशे तस्य सार्वधातुकत्वात् सार्वधातुके यक् (अ.३/१/६७) इत्यनेन यक्प्रत्ययेऽनुबन्धलोपे टित आत्मनेपदानां टेरे (अ.३/४/७९) इत्यनेन टेरेत्वे झोऽन्तः (अ.७/१/३) इत्यनेनान्तादेशेऽतो गुणे (अ.६/१/१७) इत्यनेन पररूपे दृश्यन्त इति सिद्ध्यति। कर्तरि लकारे तु पश्यन्तीति रूपं साधु।

**धारयन्त्यायुधानीत्थम् (दे.क.,१५)**

देव्यः दैत्यानां देहनाशाय, भक्तानामभयाय, देवानां हिताय चेत्थमायुधानि धारयन्तीत्यन्वयः। अत्र धारयन्तीति तिङन्तपदं वर्तते। धृञ् धारणे धातुरयमुभयपदी भ्वादिगणपठितः सकर्मकोऽनिट् च वर्तते (कौ.धा., ९००)। तस्मात् हेतुमति च (अ.३/१/२६) इत्यनेन णिच्प्रत्ययेऽनुबन्धलोपेऽचो ञ्णिति (अ.७/२/११५) इत्यनेन आदिवृद्धौ रपरत्वे

वर्णसम्मेलने धारीति जाते णिजन्तत्वात् सनाद्यन्ता धातवः (अ.३/१/३२) इत्यनेन धातुसंज्ञायां वर्तमाने लट् (अ.३/२/१२३) इत्यनेन कर्तरि लट्यनुबन्धलोपे लस्य स्थाने प्रथमपुरुषस्य बहुवचने झ्यादेशे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे झोऽन्तः (अ.७/१/३) इत्यनेन झस्यान्तादेशेऽतो गुणे (अ.६/१/६७) इत्यनेन पररूपे सार्वधातुकार्धधातुकयोः (अ.७/३/८४) इत्यनेन गुणे एचोऽयवायावः (अ.६/१/७८) इत्यनेनायादेशे वर्णसम्मेलने धारयन्तीति रूपं सम्भवति। अस्मात् कर्तरि लकारे धरन्ति, कर्मणि ध्रियन्ते इति दिक्।

**नमस्तेऽस्तु महारौद्रे (दे.क.,१६)**

महारौद्रे महाघोरपराक्रमे महाबले महोत्साहे भहाभयविनाशिनि हे देवि ! ते नमोऽस्तु, इत्यन्वयः। अत्र अस्त्विति तिङन्तपदम्। अस भुव्ययमदादिगणपठितोऽकर्मकः परस्मैपदी सेट् च धातुर्वर्तते (कौ.धा., १०६५)। तस्माद्धातोर्लोट् च (अ.३/३/१६२) इत्यनेन लोट्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यदिप्रभृतिभ्यः शपः (अ.२/४/७२) इत्यनेन शपो लुक्येरुः (अ.३/४/८६) इत्यनेनोत्वे तुह्योस्तातङाशिष्यन्यतरस्याम् (अ.७.१.३५) इत्यनेन विकल्पेन तातङादेशेऽनुबन्धलोपे श्नसोरल्लोपः (अ.६/४/१११) इत्यनेनाकारलोपे स्तादिति, तातङादेशाभावपक्षेऽस्तु इति रूपे सिद्धतामायातः। शास्त्रान्तरेषु चास्य प्रयोगः प्राप्यते– नमोऽस्तु ते देववर प्रसीद (गीता, ११/३१)। धातोरस्माद्भावे लकारे तु भूयतामिति सिद्ध्यति।

**त्राहि मां देवि दुष्प्रेक्ष्ये (दे.क.,१७)**

दुष्प्रेक्षे शत्रूणां भयवर्धिनि हे देवि ! मां त्राहीत्यन्वयः। अत्र त्राहीति तिङन्तपदं वर्तते। त्रैङ् पालने भ्वादिगणपठितोऽयमात्मनेपदी सकर्मकोऽनिट् च धातुः (कौ.धा., ९६५)। अस्माद्धातोर्लोट्लकारे आत्मनेपदे मध्यमपुरुषैकवचने थासादेशे तस्य सार्वधातुकत्वात् सार्वधातुके यक् (अ.३/१/६७) इत्यनेन यक्प्रत्ययेऽनुबन्धलोपे थासः से (अ.३/४/८०) इत्यनेन थासः स्थाने से–आदेशे सवाभ्यां वामौ (अ.६/४/१११) इत्यनेनैकारस्य वादेशे एचोऽयवायावः (अ.६/१/७८) इत्यनेनायादेशे वर्णसम्मेलने च कृते त्रायस्वेति निष्पद्यते। श्लोकेऽस्मिन् प्रयुक्तस्य त्राहीत्यस्य दुर्गे मां पालयेत्यर्थो भवति (शर्मा, १९७२ : १९)। यथा परस्मैपदिनः पा रक्षणे (कौ.धा., १०५६) इत्यस्माद्धातोर्लोटि मध्यमपुरुषैकवचने पाहीति रूपं सम्भवति तथैव त्रैधातोर्न, धातोरस्यात्मनेपदविषयत्वात्। अत्र कवचे पाणिनीयव्याकरणाभिमते त्रायस्वेति प्रयोक्तव्यमासीत्; परन्तु त्राहीति प्रयुक्तमस्ति, यच्चापाणिनीयं रूपम्।

**प्राच्यां रक्षतु मामैन्द्री (दे.क.,१७)**

देवीकवचेऽस्मिन् रक्षत्विति प्रयोगः पञ्चसु स्थानेषु प्रयुक्तो विद्यते। तद्यथा– प्राच्यां रक्षतु मामैन्द्री (दे.क.,१७)। दन्तान् रक्षतु कौमारी (दे.क.,२५)। आयु रक्षतु वाराही (दे.क.,३९)। धर्मं रक्षतु वैष्णवी (दे.क.,३९)। भार्यां रक्षतु भैरवी (दे.क.,४०) इति। अत्र तन्निष्पत्तिप्रकारः प्रदर्श्यते–

रक्ष पालने भ्वादिगणस्थो धातुरयं परस्मैपदी सकर्मकः सेट् च वर्तते (कौ.धा., ६५८)। अस्माद्धातोर्लोट् च (अ.३/३/१६२) इत्यनेन लोट्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे एरुः (अ.३/४/६८) इत्यनेनेकारस्योत्वे वर्णसम्मेलने रक्षत्वित्यवस्थायां तुह्योस्तातङाशिष्यन्यतरस्याम् (अ.७/१/३५) इत्यनेन विकल्पेन तातङादेशेऽनुबन्धलोपे रक्षतादिति, तातङादेशाभावपक्षे रक्षत्विति रूपद्वये भवतः। पालयत्विति तयोरर्थः। कर्मणि लकारे तु लोट्लकारस्य प्रथमपुरुषैकवचने तु रक्ष्यतामिति निष्पद्यते।

**दक्षिणेऽवतु वाराही (दे.क.,१८)**

अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादान–भागवृद्धिष्विति भ्वादिगणपठितः परस्मैपदी सकर्मकः सेट् च धातुर्वर्तते (कौ.धा., ६००)। पूर्वोक्तेषु विविधार्थेष्वत्र धातुरयं रक्षणार्थे एव प्रयुक्तो दृश्यते। रक्षणार्थकादवधातोर्लोट् च (अ.३/३/१६२) इत्यनेन लोट्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे एरुः (अ.३/४/६८) इत्यनेनेकारस्योत्वे वर्णसम्मेलनेऽवत्वित्यवस्थायां तुह्योस्तातङाशिष्यन्यतरस्याम् (अ.७/१/३५) इत्यनेन विकल्पेन तातङादेशेऽनुबन्धलोपेऽवतादिति, तातङादेशाभावपक्षेवऽत्विति रूपे सम्भवतः। कर्मणि लकारे तु लोट्लकारस्य प्रथमपुरुषैकवचने त्वव्यतामिति निष्पद्यते। सप्तशतीसर्वस्वे देवीकवचे तु 'दक्षिणेऽवतु वाराही' इत्यस्य स्थाने 'दक्षिणे रक्ष वाराही' इति पाठान्तरं दृश्यते। तस्य च हे दक्षिणदिशि स्थिता वाराहि ! त्वं मां रक्षेत्यर्थो भवति (शर्मा, १९७२ : १९)।

**प्रतीच्यां वारुणी रक्षेत् (दे.क.,१८)**

अस्मिन् देवीकवचे रक्षेदिति तिङन्तपदं त्रयोविंशति स्थानेषु प्रयुक्तं वर्तते। तद्यथा– प्रतीच्यां वारुणी रक्षेत् (दे.क.,१८)। ऊर्ध्वं ब्रह्माणि मे रक्षेत् (दे.क.,१९)। एवं दशदिशो रक्षेत् (दे.क.,२०)। शिखामुद्योतिनी रक्षेत् (दे.क.,२१)। भ्रुवौ रक्षेत् यशस्विनी (दे.क.,२२)। कपोलौ कालिका रक्षेत् (दे.क.,२३)। कामाक्षी चिबुकं रक्षेत् (दे.क.,२६)। स्कन्धयोः खड्गिनी रक्षेत् (दे.क.,२७) हस्तयोर्दण्डिनी रक्षेत् (दे.क.,२८)। नखाञ्छूलेश्वरी रक्षेत् (दे.क.,२८)। कुक्षौ रक्षेत् कुलेश्वरी (दे.क.,२८)। स्तनौ रक्षेन् महादेवी (दे.क.,२९)। नाभौ च कामिनी रक्षेत् (दे.क.,३०)। कट्यां भगवती रक्षेत् (दे.क.,३१)। जङ्घे महाबला रक्षेत् (दे.क.,३१)। पादाङ्गुलीषु श्री रक्षेत् (दे.क.,३२)। शुक्रं ब्रह्माणि मे रक्षेत् (दे.क.,३६)। रक्षेन्मे धर्मधारिणी (दे.क.,३६)। वज्रहस्ता च मे रक्षेत् (दे.क.,३७)। रक्षेन्नारायणी सदा (दे.क.,३८)। गोत्रमिन्द्राणि मे रक्षेत् (दे.क.,४०)। पुत्रान् रक्षेन्महालक्ष्मीः (दे.क.,४०)। पन्थानं सुपथा रक्षेत् (दे.क.,४१) इति। तत्साधनप्रकारश्चात्र प्रदर्श्यते–

पालनार्थकाद् रक्षधातोर्विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (अ.३/३/१६१) इत्यनेन विधिलिङ्लकारेऽनुबन्धलोपे लस्य परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे इतश्च (अ.३/४/१००) इत्यनेनेकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च (अ.३/४/१०३) इत्यनेन यासुडागमेऽनुबन्धलोपे सुट्तिथोः (अ.३/४/१०७) इत्यनेन सुडागमेऽनुबन्धलोपे लिङः सलोपोऽनन्त्यस्य (अ.७/२/७९) इत्यनेन सलोपेऽतो येयः (अ.७/२/८०) इत्यनेनेयादेशे लोपो व्योर्वलि (अ.६/१/६६) इत्यनेन यलोपे आद्गुणः (अ.६/१/८७) इत्यनेन गुणे रक्षेदिति रूपं साधु। कर्मणि लकारे तु रक्ष्येत इति सिद्ध्यति।

**उदीच्यां पातु कौमारी (दे.क.,१९)**

कवचेऽस्मिन् पात्विति तिङन्तपदं त्रिषु स्थानेषु प्रयुक्तं प्राप्यते। तद्यथा– उदीच्यां पातु कौमारी (दे.क.,१९)। जया मे चाग्रतः पातु (दे.क.,२०)। विजया पातु पृष्ठतः (दे.क.,२०) इति। तत्सिद्धिप्रक्रिया चेत्थं प्रदर्श्यते–

पा रक्षणेऽदादिगणपठितोऽयं धातुः परस्मैपदी सकर्मकोऽनिट् च वर्तते (कौ.धा., १०५६)। तस्माल्लोट् च (अ.३/३/१६२) इत्यनेन लोट्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यदिप्रभृतिभ्यः शपः (अ.२/४/७२) इत्यनेन शपो लुक्येरुः (अ.३/४/६८) इत्यनेनेकारस्योत्वे वर्णसम्मेलने पात्वित्यवस्थायां तुह्योस्तातङाशिष्यन्यतरस्याम् (अ.७/१/३५) इत्यनेन

विकल्पेन तातङादेशेऽनुबन्धलोपे पातादिति, तातङादेशाभावपक्षे पात्विति रूपे भवतः। कर्मणि लकारे तु लोट्लकारस्य प्रथमपुरुषैकवचने तु पायतामिति निष्पद्यते।

**पशून्मे रक्ष चण्डिके (दे.क.,४०)**

अत्र देवीकवचे रक्षेति तिङन्तपदं द्वयोः स्थानयोः प्रयुक्तं विद्यते– पशून्मे रक्ष चण्डिके (दे.क.,४०) इत्यत्र, तत्सर्वं रक्ष मे देवि ! (दे.क.,४२) इत्यत्र च। साधनप्रकारो यथा– रक्षधातोर्लोट् च (अ.७/१/३५) इत्यनेन लोट्लकारेऽनुबन्धलोपे परस्मैपदे मध्यमपुरुषैकवचने सिबादेशेऽनुबन्धलोपे सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे सेर्ह्यपिच्च (अ.३/४/८७) इत्यनेन सेर्ह्यादिशे रक्ष+हीत्यवस्थायां तुह्योस्तातङाशिष्यन्यतरस्याम् (अ.७/१/३५) इत्यनेन विकल्पेन तातङादेशेऽनुबन्धलोपे रक्षतादिति, तातङादेशाभावपक्षेऽतो हेः (अ.६/४/१०५) इत्यनेन हेर्लुकि च सति रक्षेति रूपम्। कर्मणि लकारे तु लोट्लकारस्य प्रथमपुरुषैकवचने तु रक्षस्वेति सिद्ध्यति।

**पदमेकं न गच्छेत्तु (दे.क.,४३)**

गम्लृ गतौ भ्वादिगणपठितोऽयं धातुः परस्मैपदी सकर्मकोऽनिट् च वर्तते (कौ.धा., ९८२)। तस्माद् विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (अ.३/३/१६१) इत्यनेन विधिलिङ्लकारेऽनुबन्धलोपे लस्य परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे इतश्च (अ.३/४/१००) इत्यनेनेकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च (अ.३/४/१०३) इत्यनेन यासुडागमेऽनुबन्धलोपे सुट्तिथोः (अ.३/४/१०७) इत्यनेन सुडागमेऽनुबन्धलोपे इषुगमियमां छः (अ.७/३/७७) इत्यनेन मस्य छत्वे गछ्+अ+यास्+स्त् इत्यवस्थायां लिङः सलोपोऽनन्त्यस्य (अ.७/२/७९) इत्यनेन सलोपेऽतो येयः (अ.७/२/८०) इत्यनेनेयादेशे छे च (अ.६/१/७३) इत्यनेन तुगागमेऽनुबन्धलोपे लोपो व्योर्वलि (अ.६/१/६६) इत्यनेन यलोपे आद्गुणः (अ.६/१/८७) इत्यनेन गुणे स्तोः श्चुना श्चुः (अ.८/४/४०) गच्छेदिति रूपं साधु। शास्त्रान्तरेषु चास्य प्रयोगो दृश्यते– तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ (गीता, ३.३४) इति। कर्मणि लकारे तु गम्येत इति सिद्ध्यति।

**यदीच्छेच्छुभमात्मनः (दे.क.,४३)**

इषु इच्छायामिति तुदादिगणपठितोऽयं धातुः परस्मैपदी सकर्मकः सेट् च वर्तते (कौ.धा., १३५१)। तस्माद् विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (अ.३/३/१६१) इत्यनेन विधिलिङ्लकारेऽनुबन्धलोपे लस्य परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकसंज्ञायां तुदादिभ्यः शः (अ.३/१/७७) इत्यनेन शप्रत्ययेऽनुबन्धलोपे इतश्च (अ.३/४/१००) इत्यनेनेकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च (अ.३/४/१०३) इत्यनेन यासुडागमेऽनुबन्धलोपे सुट् तिथोः (अ.३/४/१०७) इत्यनेन सुडागमेऽनुबन्धलोपे इषुगमियमां छः (अ.७/३/७७) इत्यनेन षस्य छत्वे इछ्+अ+यास्+स्त् इत्यवस्थायां लिङः सलोपोऽनन्त्यस्य (अ.७/२/७९) इत्यनेन सलोपे अतो येयः (अ.७/२/८०) इत्यनेनेयादेशे छे च (अ.६/१/७३) इत्यनेन तुगागमेऽनुबन्धलोपे  लोपो व्योर्वलि (अ.६/१/६६) इत्यनेन यलोपे आद्गुणः (अ.६/१/८७) इत्यनेन गुणे स्तोः श्चुना श्चुः (अ.८/४/४०) इच्छेदिति रूपं साधु। कर्मणि लकारे तु्विष्येत इति सिद्ध्यति।

**यत्र यत्रैव गच्छति (दे.क.,४३)**

गम्लृ गतौ (कौ.धा., ९८२) इत्यस्माद्धातोर्लट्लकारे परस्मैपदे प्रथमपुरुषैकवचने तिबादेशे कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे इषुगमियमां छः (अ.७/३/७७) इत्यनेन गम्धातोर्मकारस्य छकारे कृते

गछ्+अ+तीत्यवस्थायां छे च (अ.६/१/७३) इत्यनेन तुगागमेऽनुबन्धलोपे स्तोः श्चुना श्चुः (अ.८/४/४०) इत्यनेन श्चुत्वे वर्णमेलने च सति गच्छतीति रूपं निष्पद्यते। कर्मणि लकारे तु गम्यते इति रूपं सम्भवति।

**यं यं चिन्तयते कामम् (दे.क.,४४)**

चिति स्मृत्यामिति चुरादिगणपठितोऽयमुभयपदी धातुः सकर्मकः सेट् च वर्तते (कौ.धा., १५३५)। तस्मादिदितो नुम्धातोः (अ.७/१/५८) इत्यनेन नुमागमेऽनुबन्धलोपे सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण–चुरादिभ्यो णिच् (अ.३/१/२५) इत्यनेन णिच्प्रत्ययेऽनुबन्धलोपे वर्तमाने लट् (अ.३/२/१२३) इत्यनेन लट्लकारेऽनुबन्धलोपे णिचश्च (अ.१/३/७४) इत्यनेनात्मनेपदे प्रथमपुरुषैकवचने तादेशे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे टित आत्मनेपदानां टेरे (अ.३/४/७९) इत्यनेन टेरेत्वे सार्वधातुकार्धधातुकयोः (अ.७/३/८४) इत्यनेन गुणे एचोऽयवायावः (अ.६/१/७८) इत्यनेनायादेशे वर्णसम्मेलने चिन्तयते इति रूपं सिद्ध्यति। अस्माद्धातोः परस्मैपदे चिन्तयति, कर्मणि लकारे तु चिन्त्यते इति सम्भवति।

**तं तं प्राप्नोति निश्चितम् (दे.क.,४४)**

देवीकवचे प्राप्नोतीति तिङन्तपदं द्वयोः स्थानयोः प्रयुक्तं दृश्यते– तं तं प्राप्नोति निश्चितम् (दे.क.,४४) इत्यत्र, प्राप्नोति पुरुषो नित्यम् (दे.क.,५६) इत्यत्र च। तत्साधनप्रकारोऽत्र प्रदर्श्यते–

देहान्ते सः (यो नित्यं कवचं पठित्वा सप्तशतीं पठति) महामायाप्रसादतो यत् सुरैरपि दुर्लभं परमं स्थानमस्ति, तं प्राप्नोति। आप्लृ व्याप्तौ स्वादिगणपठितोऽयं धातुः परस्मैपदी सकर्मकोऽनिट् च वर्तते (कौ.धा., १२६०)। तस्माद्धातोर्वर्तमाने लटि प्रथमपुरुषैकवचने तिबादेशे तस्य सार्वधातुकसंज्ञायां शपि प्राप्ते तं प्रबाध्य स्वादिभ्यः श्नुः (अ.३/१/७३) इत्यनेन श्नुप्रत्ययेऽनुबन्धलोपे सार्वधातुकार्धधातुकयोः (अ.७/३/८४) इत्यनेनोकारस्य गुणे आप्नोतीति निष्पद्यते, तस्य च व्यापकत्वं भवतीत्यर्थः। अस्य प्रयोगः शास्त्रान्तरेषु च प्राप्यते– स शान्तिमाप्नोति न कामकामी (गीता, २/७०)। ततः प्रोपसर्गस्य योगेऽकः सवर्णे दीर्घः (अ.६/१/१०१) इत्यनेन सवर्णदीर्घे प्राप्नोतीति जायते। अत्र प्रोपसर्गस्य योगे उपसर्गबलात् प्राप्तं करोतीत्यर्थो लभ्यते। कर्मणि तु प्राप्यते इति प्रयुज्यते।

**प्राप्स्यते भूतले पुमान् (दे.क.,४५)**

प्रोपसर्गपूर्वकादाप्लृ व्याप्तौ (कौ.धा., १२६०) इत्यस्माद्धातोर्लृट् शेषे च (अ.३/३/११३) इत्यनेन कर्मणि लृट्लकारेऽनुबन्धलोपे भावकर्मणोः (अ.१/३/१३) इत्यनेन लस्यात्मनेपदे लृट्लकारे प्रथमपुरुषैकवचने तादेशे तस्य सार्वधातुकसंज्ञायां शपं प्रबाध्य स्यतासी लृलुटोः (अ.३/१/३३) इत्यनेन स्यप्रत्यये टित आत्मनेपदानां टेरे (अ.३/४/७९) इत्यनेन टेरेत्वेऽकः सवर्णे दीर्घः (अ.६/१/१०१) इत्यनेन सवर्णदीर्घे च सति प्राप्स्यते इति साधु। कर्तरि लकारे तु प्राप्स्यतीति सिद्ध्यति।

**त्रैलोक्ये तु भवेत् पूज्यः (दे.क.,४५)**

दुर्गाकवचे भवेदिति तिङन्तपदं त्रिषु स्थानेषु प्राप्यते। तद्यथा– त्रैलोक्ये तु भवेत् पूज्यः (दे.क.,४५)। दैवीकलाभवेत्तस्य (दे.क.,४७)। मानोन्नतिर्भवेद्राज्ञः (दे.क.,५३) इति। तन्निर्मितिप्रकारश्च यथा–

भू सत्तायामयं भ्वादिगणेषु प्रथमः परस्मैपदी सकर्मकः सेट् च धातुर्वर्तते (कौ.धा., १)। भूशब्दस्य भूवादयो धातवः (अ.१/३/१) इत्यनेन धातुसंज्ञायां विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (अ.३/३/१६१) इत्यनेन विधलिङ्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे इतश्च (अ.३/४/१००) इत्यनेनेकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च

(अ.३/४/१०३) इत्यनेन यासुडागमेऽनुबन्धलोपे सुट्तिथोः (अ.३/४/१०७) इत्यनेन सुडागमेऽनुबन्धलोपे लिङः सलोपोऽनन्त्यस्य (अ.७/२/७९) इत्यनेन सलोपेऽतो येयः (अ.७/२/८०) इत्यनेनेयादेशे लोपो व्योर्वलि (अ.६/१/६६) इत्यनेन यलोपे सार्वधातुकार्धधातुकयोः (अ.७/३/८४) इत्यनेन गुणे एचोऽयवायावः (अ.६/१/७८) इत्यनेनावादेशे आद्गुणः (अ.६/१/८७) इत्यनेन गुणे वर्णसम्मेलने भवेदिति रूपं साधु। शास्त्रान्तरेषु चास्य प्रयोगः समुपलभ्यते– धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् (गीता, १/४६)। भावे लकारे तु भूयेत इति सिद्ध्यति।

**यः पठेत् प्रयतो नित्यम् (दे.क.,४७)**

पठ व्यक्तायां वाचि धातुरयं भ्वादिगणपठितः सकर्मकः परस्मैपदी सेट् च वर्तते (कौ.धा., ३३०)। तस्माद् विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (अ.३/३/१६१) इत्यनेन विधिलिङ्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे इतश्च (अ.३/४/१००) इत्यनेनेकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च (अ.३/४/१०३) इत्यनेन यासुडागमेऽनुबन्धलोपे सुट्तिथोः (अ.३/४/१०७) इत्यनेन सुडागमेऽनुबन्धलोपे लिङः सलोपोऽनन्त्यस्य (अ.७/२/७९) इत्यनेन सलोपेऽतो येयः (अ.७/२/८०) इत्यनेनेयादेशे लोपो व्योर्वलि (अ.६/१/६६) इत्यनेन यलोपे आद्गुणः (अ.६/१/८७) इत्यनेन गुणे वर्णसम्मेलने पठेदिति रूपं सम्भवति। कर्मणि लकारे तु पठ्येत इति सम्भवति।

**जीवेद् वर्षशतं साग्रम् (दे.क.,४८)**

जीव प्राणधारणे (कौ.धा., ५६२) भ्वादिगणस्थोऽकर्मकः परस्मैपदी सेट् च धातुरयम्। तस्माद् विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (अ.३/३/१६१) इत्यनेन विधिलिङ्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे इतश्च (अ.३/४/१००) इत्यनेनेकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च (अ.३/४/१०३) इत्यनेन यासुडागमेऽनुबन्धलोपे सुट्तिथोः (अ.३/४/१०७) इत्यनेन सुडागमेऽनुबन्धलोपे लिङः सलोपोऽनन्त्यस्य (अ.७/२/७९) इत्यनेन सलोपेऽतो येयः (अ.७/२/८०) इत्यनेनेयादेशे लोपो व्योर्वलि (अ.६/१/६६) इत्यनेन यलोपे आद्गुणः (अ.६/१/८७) इत्यनेन गुणे वर्णसम्मेलने पठेदिति रूपं सिद्धिमायाति। भावे लकारे तु जीव्येत इति सिद्ध्यति।

**नश्यन्ति व्याधयः सर्वे (दे.क.,४८)**

कवचेऽस्मिन् नश्यन्तीति तिङन्तपदं द्वयोः स्थानयोः समुपलभ्येते– नश्यन्ति व्याधयः सर्वे (दे.क.,४८) इत्यत्र, नश्यन्ति दर्शनात्तस्य (दे.क.,५२) इत्यत्र च। तत्साधनप्रकारश्चेत्थं प्रदर्श्यते–

णश अदर्शने (कौ.धा., ११९४) दिवादिगणपठितोऽयं धातुः परस्मैपदी वेडकर्मकश्च वर्तते। अस्य णो नः (अ.६/१/६५) इत्यनेन नत्वे नश्धातोर्लटि परस्मैपदे प्रथमपुरुषस्य बहुवचने झ्यादेशे तस्य सार्वधातुकत्वात् दिवादिभ्यः श्यन् (अ.३/१/६९) इत्यनेन श्यन्प्रत्ययेऽनुबन्धलोपे झोऽन्तः (अ.७/१/३) इत्यनेनान्तादेशेऽतोगुणे (अ.६/१/९७) इत्यनेन पररूपे नश्यन्तीतिसिद्धिमायाति। शास्त्रान्तरेषु चास्य प्रयोगो दृश्यते– कुलक्षये प्रणस्यन्ति कुलधर्माः सनातनाः (गीता, १/४०)। भावे लकारे तु नश्यत इति सिद्ध्यति।

**यशसा वर्धते सोऽपि (दे.क.,५३)**

वृधु वृद्धौ (कौ.धा., ७५९) धातुरयं भ्वादिगणपठितोऽकर्मकः सेडात्मनेपदी च वर्तते। अस्माद्धातोर्लटि लस्यात्मनेपदे प्रथमपुरुषैकवचने तादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन

शप्यनुबन्धलोपे टित आत्मनेपदानां टेरे (अ.३/४/७९) इत्यनेन टेरेत्वे पुगन्तलघूपधस्य च (अ.७/३/८६) इत्यनेन लघूपधगुणे वर्णयोगे च सति वर्धत इति सम्भवति। भावे लकारे तु वृध्यत इति सिद्ध्यति।

**जपेत् सप्तशतीं चण्डीम् (दे.क.,५४)**

जप व्यक्तायां वाचि मानसे च (कौ.धा., ३९७) अयं भ्वादिगणपठितः परस्मैपदी सकर्मकः सेट् च धातुर्वर्तते। विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (अ.३/३/१६१) इत्यनेन विधिलिङ्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे इतश्च (अ.३/४/१००) इत्यनेनेकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च (अ.३/४/१०३) इत्यनेन यासुडागमेऽनुबन्धलोपे सुट्तिथोः (अ.३/४/१०७) इत्यनेन सुडागमेऽनुबन्धलोपे लिङः सलोपोऽनन्त्यस्य (अ.७/२/७९) इत्यनेन सलोपेऽतो येयः (अ.७/२/८०) इत्यनेनेयादेशे लोपो व्योर्वलि (अ.६/१/६६) इत्यनेन यलोपे आद्गुणः (अ.६/१/८७) इत्यनेन गुणे वर्णसम्मेलने जपेदिति रूपं सिद्धिपथमायाति। कर्मणि लकारे तु जप्येत इति सम्भवति।

**यावद् भूमण्डलं धत्ते (दे.क.,५४)**

डुधाञ्धारणपोषणयोः (कौ.धा., १०९२) जुहोत्यादिगणपठितोऽयमुभयपदी धातुः सकर्मकोऽनिट् च वर्तते। तस्माद्धातोः आदिर्ञिटुडवः (अ.१/३/५) इत्यनेन ड्वित्यस्येत्संज्ञायां लोपे धातुत्वाल्लट्लकारे आत्मनेपदे प्रथमपुरुषैकवचने तादेशे तस्य सार्वधातुकसंज्ञायां कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे जुहोत्यादिभ्यः श्लुः (अ.२/४/७५) इत्यनेन शपो श्लौ, श्लौ (अ.६/१/१०) इत्यनेन धातोर्द्वित्वे धा+धा+त इत्यवस्थायां ह्रस्वः (अ.७/४/५९) इत्यनेन ह्रस्वेऽभ्यासे चर्च (अ.८/४/५४) इत्यनेनाभ्यासधातोश्चर्त्वे टित आत्मनेपदानां टेरे (अ.३/४/७९) इत्यनेन टेरेत्वे श्नाभ्यस्तयोरातः (अ.६/४/११२) इत्यनेनाकारलोपे दधस्तथोश्च (अ.८/२/३८) इत्यनेन दस्य धत्वे खरि च (अ.८/४/५५) इत्यनेन चर्त्वे च सति धत्ते इति सिद्ध्यति। परस्मैपदे दधातीति, कर्मणि धीयते इति च सिद्धम्।

**तावत्तिष्ठति मेदिन्याम् (दे.क.,५५)**

ष्ठा गतिनिवृत्तौ (कौ.धा., ९२८) अमकर्मकोऽयं परस्मैपदी धातुर्भ्वादिगणीयोऽनिट् च वर्तते। अत्र धात्वादेः षः सः (अ.६/१/६४) इत्यनेन षस्य सादेशानन्तरं निमित्तापाये नैमित्तिकस्याप्यपायः इति नियमेन ष्टुत्वभूतठकारोऽपि थकाररूपमागच्छति। तेन स्थाधातोः वर्तमाने लट् (अ.३/२/१२३) इत्यनेन लट्यनुबन्धलोपे परस्मैपदे प्रथमपुरुषैकवचने तत्स्थानिकतिबादेशेऽनुबन्धलोपे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शपि पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (अ.७/३/७८) इत्यनेन स्थाधातोस्तिष्ठादेशेऽतोगुणे (अ.६/१/९७) इत्यनेन पररूपे च सति तिष्ठतीति रूपं निष्पन्नम्। शास्त्रान्तरेषु चास्य प्रयोगः प्राप्यते– नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्इति (गीता, ३.५)। भावे लकारे तु स्थीयत इति।

**लभते परमं रूपम् (दे.क.,५६)**

डुलभष् प्राप्तौ (कौ.धा., ९७५) इति सकर्मकोऽयमात्मनेपदी धातुर्भ्वादिगणीयोऽनिट् च वर्तते। आदिर्ञिटुडवः (अ.१/३/५) इत्यनेन ड्वित्संज्ञायां षस्येत्संज्ञायाञ्च लोपे सति लभित्यवशिष्यते। तस्माद् वर्तमाने लटि तस्यात्मनेपदे प्रथमपुरुषैकवचने तादेशे सार्वधातुकसंज्ञायां शपि टेरेत्वे च कृते लभते इति निष्पद्यते। तस्य च प्राप्नोतीत्यर्थः। एतादृशः प्रयोगः शास्त्रान्तरेषु च दृश्यते– श्रद्धावाँल्लभते ज्ञानमिति (गीता, ४/३९)। कर्मणि लकारे तु लभ्यते इति रूपं सम्भवति।

**शिवेन सह मोदते (दे.क.,५६)**

मुद हर्षे (कौ.धा., १६) इत्यस्माद्धातोः कर्तरि वर्तमाने लट् (अ.३/२/१२३) इत्यनेन लट्यात्मनेपदे प्रथमपुरुषैकवचने तादेशे तस्य सार्वधातुकत्वात् कर्तरि शप् (अ.३/१/६८) इत्यनेन शप्यनुबन्धलोपे मुद्+अ+त इत्यवस्थायां टित्त्वात् टित आत्मनेपदानां टेरे (अ.३/४/७९) इत्यनेन टेरेत्वे मोदते इति सम्पद्यते। तेन यो मनुष्यः कवचमिदं पठित्वा सप्तशतीं पठति, सो भगवता शिवेन सह सहर्षं सानन्दञ्च तिष्ठतीत्यर्थो लभ्यते। भावे तु मुद्यते इति रूपम्। अकर्मकोऽयमात्मनेपदी धातुर्भ्वादिगणीयः सेट् च वर्तते। पाणिनीयधातुपाठेऽपरश्च मुदधातुः पठितोऽस्ति। स चोभयपदी संसर्गार्थकश्चुरादिगणपठितः सकर्मकः सेट् च वर्तते। अस्मिन् कवचे तस्य प्रयोगो नास्तीति।

## निष्कर्षः

देव्युपासनासन्दर्भे श्रीदुर्गासप्तशत्यन्तर्गतं देवीकवचमतीव प्रसिद्धं वर्तते। षट्पञ्चाशच्छ्लोकनिबद्धेऽस्मिन् कवचे सप्तषष्टिस्तिङन्तपदानि प्रयुक्तानि। तेषु चतुस्त्रिंशत्सङ्ख्यकानि पदान्यावृत्तानि, त्रयस्त्रिंशत्सङ्ख्यकानि पदान्येकवारमेवागतानि। जायते, रक्षतु, रक्षेत्, पातु, रक्ष, प्राप्नोति, भवेत्, नश्यन्त्येतेषामष्टानां पदानामावृत्तिर्दृश्यते। जायते, प्राप्नोति, रक्ष, नश्यन्त्येतानि पदानि द्विवारं; पातु, भवेदिति च पदे त्रिवारं; रक्षत्विति पदं पञ्चवारं; रक्षेदिति पदं त्रयोविंशतिवारं समागताः सन्ति। कवचेऽस्मिन् रक्षेदिति पदं त्रयोविंशतिस्थानेषु प्रयुक्तम्, तत्पदमेकस्मिन्नेव श्लोके त्रिवारमागच्छति। तद्यथा–

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च। नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेत् कुलेश्वरी॥ (दे.क.,२८)

इत्थं तिङन्तपदप्रयोगचातुर्यमत्र प्रदर्शितम्। एवञ्चात्र पञ्चविंशतिधातूनां प्रयोगो विहितोऽस्ति। तत्रापि अस्धातोर्द्वे, जन्धातोर्द्वे, दृश्धातोर्द्वे, रक्षधातोश्चत्वारि, गम्धातोर्द्वे, प्रपूर्वकाप्लृधातोश्च द्वे पदे समुपलभ्येते। ब्रू–श्रृ–स्मृ–धृ–त्रै–अव–पा–इष्–चिति–भू–पठ्–जीव्–नश्–वृध्–जप्–धा–स्था–लभ्–मुदेतेषां धातूनामेकैकप्रयोगाः समुपलभ्यन्ते। अत्र षोडशपदानि लट्लकारस्य, नव लोट्लकारस्य, सप्त विधिलिङ्लकारस्य, लृट्लकारस्यैकं पदं प्रयुक्तम्। तथैवात्र रक्षतु, पातु, अवत्वेतेषां त्रयाणां समानार्थकधातूनां प्रयोगो विद्यते।

महर्षिपाणिनिः श्रुधातुः परस्मैपदं पठति, परन्त्वत्र शृणुष्वेत्यात्मनेपदं प्रयुक्तम्। पाणिनीयव्याकरणानुसारमत्र शृणु, शृणुताद् वेति भवितव्यमासीत्। एवं रक्षधातोरपि परस्मैपदत्वेनोपदिष्टत्वात् रक्षसीति प्रयोक्तव्यमासीत्, परन्तु परस्मैपदस्य स्थाने रक्षसे इत्यात्मनेपदं प्रयुक्तम्। एवञ्च पाणिनिना त्रैधातुरात्मनेपदमुपदिष्टम्, तेन कवचे त्रायस्वेति प्रयोक्तव्यमासीत् परन्तु त्राहीति प्रयुक्तमस्ति। इत्थं दुर्गासप्तशत्यन्तर्गतदेवीकवचस्थश्लोकेषु प्रयुक्तानां त्रयस्त्रिंशत्तिङन्तपदानां व्युत्पत्तिविश्लेषणेन सिद्ध्यति यत्तत्र श्रृणुष्व, रक्षसे, त्राहीति त्रयोऽपाणिनीयप्रयोगाः प्रयुक्ताः सन्तीति निष्कर्षः सम्प्राप्यते। अपाणिनीयत्वेऽप्यार्षत्वात्तानि साधुत्वेन स्वीकर्तव्यानि भवन्तीति।

## सङ्क्षेपीकृच्छब्दसूची

अ.– अष्टाध्यायी, गीता. – श्रीमद्भगवद्गीता, दे.क. – देवीकवचम्, कौ.धा. – कौमुदीधातुसङ्ख्या।

## सन्दर्भग्रन्थसूची


अमरसिंहः (२०२६), *अमरकोशः*, अनु. कुलचन्द्रगौतमः, नेपाल–राजकीय–प्रज्ञा–प्रतिष्ठान।

गिरि, स्वामीरामानन्दः (२०६९), *दुर्गासप्तशती*, पाठविधिनेपाल्यामनुवादव्याख्यासहिता, महेशसंस्कृतगुरुकुलम्।

द्विवेदी, सरयूप्रसादः (१९७२), *सप्तशतीसर्वस्वम्*, नानाविधसप्तशतीरहस्यसङ्ग्रहः, नवलकिशोरयन्त्रालयः।
https://archive.org/details/SrwD_saptashati-sarvasvam-saptashati-rahasya-sangrah-of-pt.-shri-sarayu-prasad-sharma

नागोजिभट्टः (१९५२), *दुर्गासप्तशती*, नीलकण्ठकृतटीकासहिताङ्गषट्कसहिता सभाष्यदेवीसूक्तरात्रिसूक्तसहिता, श्रीकृष्णदासात्मजेन खेमराजेन श्रीवेङ्कटेश्वरयन्त्रालयेऽङ्कितः।
https://archive.org/details/xzsR_shri-nagoji-bhatta-krita-vyakhya-sahitadi-durga-sapta-shati-1895-venkateswar-press-mumbai/page/n7/mode/1up

पतञ्जलिः (२०४२), *व्याकरणमहाभाष्यम्*, तत्त्वालोकटीकया समुल्लसितम्, व्याख्याता. रुद्रधरझाशर्मा, चौखम्बासंस्कृतसीरिज।

पाणिनिः (२०१४), *अष्टाध्यायीसूत्रपाठः*, व्याख्याता. वेदान्तकेशरी गिरि, चौखम्बा कृष्णदास अकादमी।

पाणिनिः (२०६०), *अष्टाध्यायी*, शारदाप्रभाव्याख्यासहिता, व्याख्याता. हरिप्रसादशर्मा आचार्यः, महेन्द्रसंस्कृतविश्वविद्यालयः।

वरदराजाचार्यः (२०४७), *मध्यसिद्धान्तकौमुदी,* 'सुधा''इन्दुमती'संस्कृतहिन्दीव्याख्योपेतम्, व्याख्याता. सदाशिव जोशी, चौखम्बा अमरभारती प्रकाशन।

वरदराजाचार्यः (२०५९), *लघुसिद्धान्तकौमुदी*, 'इन्दुमती'संस्कृतहिन्दीटीकोपेता, चौखम्बा अमरभारती प्रकाशन।

वेदव्यासः (२०६६), *श्रीमद्भगवद्गीता*, स्थूलाक्षरं मूलमात्रम्, गीताप्रेसः।

भट्टोजिदीक्षितः (१९६६), *वैयाकरणसिद्धान्तकौमुदी,* 'लक्ष्मी'व्याख्योपेता, व्याख्याता. सभापति उपाध्यायः (द्वितीयांशः), मोतीलाल वनारसीदास।

भट्टोजिदीक्षितः (२०२१) *वैयाकरणसिद्धान्तकौमुदी*, श्रीधरमुखोल्लासिनीहिन्दीव्याख्यासमन्विता, व्याख्याता. गोविन्दाचार्यः, चौखम्बा सुभारती प्रकाशन।

भट्टोजिदीक्षितः (२००१), *वैयाकरणसिद्धान्तकौमुदी,* श्रीवासुदेवदीक्षितप्रणीतया बालमनोरमाव्याख्ययासमलङ्कृता सैवदीपिकाख्यहिन्दीव्याख्ययोपेता, व्याख्याता. गोपालदत्तपाण्डेयः, चौखम्बासुभारतीप्रकाशन।

मिश्रः, शिवदत्तः (१९७२), *दुर्गार्चनपद्धतिः,* शिवदत्तीहिन्दीव्याख्यासहिता, ठाकुर प्रसाद पुस्तक भण्डार।

शन्तनुचक्रवर्ती (२०२३), *दुर्गासप्तशती,* प्राचीना शान्तनवीटीकासमेता, सत्यव्रतशास्त्रिणा सङ्कलितः।
https://archive.org/details/jiex_durga-sapta-shati-with-shantanavi-annotation-shri-venkateswar-pressmumbai/page/n4/mode/1up

Jha, Srujan (2023), Shabdakalpadruma, Sanskrit Dictionary।